# विशेषसमवायपदार्थपरिशीलनम्

**पुरुषोत्तम आचार्यः**
उपप्राध्यापकः, न्यायविभागः
नेपालसंस्कृतविश्वविद्यालयः, जनताविद्यापीठम्, दाङः, नेपालः
purushottam.acharya@nsu.edu.np

*https://doi.org/10.3126/haimaprabha.v21i01.44851*

**सारसंक्षेपः**

*प्रस्तुतोऽयमालेखो न्यायवैशेषिकदर्शनयोर्विशेषसमवायपदार्थयोः विवेचने केन्द्रितो वर्तते । गुणात्मकस्वरूपे सज्जीकृतेऽस्मिन् आलेखे पुस्तकालयीयविधिद्वारा प्राप्ततथ्यानां विश्लेषणं विधायान्ते निष्कर्षः प्रस्तुतो वर्तते । अत्र न्यायवैशेषिकाचार्याभिमतयोर्विशेषसमवायपदार्थयोः स्वरूपं विश्लिष्टं विद्यते । आस्तिकदर्शनेषु काणाददर्शनं वैशेषिकनाम्ना कथं विख्यातम् ? विशेषस्वरूपं कीदृशम् ? समवायस्य च स्वरूपं कीदृशम् ? इत्यादिप्रश्नाः नूनमेव मनसि परिभ्रमेयुः । तादृशाशङ्कानिरसनायैवायमालेखः प्रस्तुतः । विशेषपदार्थस्य स्वरूपचिन्तनक्रमे सर्वप्रथमं कणाद-प्रशस्तपादाचार्य-विश्वनाथप्रभृतीनामाचार्याणां मतं विविच्य निष्कर्षरूपेण नित्यद्रव्यवृत्तित्वे सति स्वतोव्यावर्तकत्वं विशेषस्य लक्षणमिति प्रस्तुतम् । एवमेव निरवयवानां परमाणूनां परस्परं भेदसाधनाय विशेषः स्वीकर्तव्यः, अन्यथा घटपटादीनां परस्परं भेदो न स्यादेव । विशेषपदार्थस्वीकृतत्वादेव काणाददर्शनं वैशेषिकनाम्ना प्रथितमित्यादिचिन्तनमत्र प्रस्तुतं विद्यते । एवमेव समवायपदार्थविश्लेषणक्रमे सर्वप्रथमं समवायस्वरूपं प्रदर्श्य अयुतसिद्धवृत्तिसम्बन्धत्वं हि तल्लक्षणं निष्कर्षरूपेण प्रस्तुतमत्र । ततः समवायसत्त्वे प्रमाणम्, तन्नित्यत्वम्, एकत्वम्, तस्य प्रत्यक्षत्वं वानुमेयत्वमित्यादिविवेचनपूर्वकमन्ते निष्कर्षः प्रदत्तो वर्तते । अस्मान्निष्कर्षान्न्यायवैशेषिकसम्बद्धयोः विशेषसमवायपदार्थयोरवबोधने जिज्ञासूनां कृतेऽयमालेख उपयोगी भविष्यतीत्यपेक्ष्यते ।)*

**शब्दकुञ्जी**
विशेषः, नित्यत्वम्, समवायः, विशिष्टबुद्धिः, अयुतसिद्धवृत्तित्वं च ।

## विषयपरिचयः

वैशेषिकोक्तपदार्थेषु पञ्चमपदार्थत्वेन विशेषस्य, षष्ठपदार्थत्वेन समवायस्य निरूपणं विद्यते । नैयायिकानामपि प्रतिपाद्यौ विषयौ इमौ द्वौ पदार्थौ । न्यायदर्शने षोडशपदार्थाः स्वीक्रियन्ते चेद् वैशेषिकदर्शने सूत्रकारेण षड् पदार्थाः निर्दिष्टाः । अनन्तरकालिकैराचार्यैः अभावमपि सङ्गृह्य सप्त पदार्थाः परिगणिताः । वैशेषिकैः परमाणुभेदसाधनाय विशेषः स्वीकृतः । स च विशेषो नित्यद्रव्येषु विद्यमानस्सन् स्वतोव्यावृत्तिरूपः । विशेषस्वीकारेणैव वैशेषिकमर्थाद् विशेषमधिकृत्य प्रवृत्तं दर्शनं वैशेषिकदर्शनमिति । प्रशस्तपादभाष्ये विशेषस्य नित्यद्रव्यवृत्तित्वम्, अनन्तत्वम्, अत्यन्तव्यावृत्तिबुद्धिहेतुत्वञ्च प्रतिपादितं विद्यते । विशेषस्यापि भेदसिद्धये विशेषान्तरं स्वीकार्यमितिपूर्वपक्षं प्रदर्श्य यदि विशेषेषु व्यावर्तकान्तरं स्वीक्रियेत, तर्हि तस्यापि पुनः तृतीयव्यावर्तकान्तरं स्वीकर्तव्यम्, येनानवस्थादोष आपद्येत । अतो विशेषस्य

स्वतोव्यावर्तकत्वं साधितं वर्ततेऽस्मिन् आलेखे। घटद्वयोः परस्परं भेदस्तु तदवयवभेदेन। अवयवद्वयोः परस्परं भेदः तदवयवभेदेन। एवंक्रमेण आपरमाणुं यावत् तत्तदवयवभेदेन तदवयविभेदस्तु सुतरामेव सिद्ध्यत्येव। निरवयवानां परमाणूनां भेदः कथम् ? इति महान् प्रश्नः। तदर्थमेव विशेषः स्वीकार्य इति सिद्धान्तोऽस्यालेखस्य प्रतिपाद्यो विषयः। भेदबुद्धेः प्रकाशको भवति विशेषः। स च नित्यद्रव्यवृत्तिः, नित्यः, अन्त्यः, स्वतोव्यावृत्त इत्यादिविषयकचिन्तनमिह प्रस्तुतं वर्तते। एवमेव विशेषविश्लेषणानन्तरं समवायो विश्लिष्टो वर्ततेऽत्र। समवायो नाम अयुतसिद्धवृत्तिसम्बन्धः। स च नित्यः, एकः, न्यायैकदेशिमते प्रत्यक्षगम्यो वैशेषिकमतेऽनुमेयः। न्यायादिग्रन्थेषु समवायस्य सम्बन्धात्मकत्वेन वैशेषिकग्रन्थेषु न सम्बन्धमात्रमपितु पदार्थत्वेनापि निरूपणं दरीदृश्यते। कारणे कार्यं विद्यत इत्याकारकबुद्धिर्यतो जायते, स समवाय इति सूत्रकारस्य कणादस्याशयो विद्यते। समवायनिरूपकसूत्रस्य व्याख्यानं कुर्वता शङ्करमिश्रेण प्रशस्तपादभाष्यकारेण च समवायस्य इह प्रत्ययहेतुत्वम्, अयुतसिद्धवृत्तिसम्बन्धत्वञ्च प्रतिपादितं वर्तते। समग्रतया विशेषपदार्थस्वीकारे का युक्तिः ? समवायसत्त्वे किं प्रमाणम् ? समवायस्य नित्यत्वमुतानित्यत्वम् ? समवायस्य प्रत्यक्षत्वमनुमेयत्वं वा ? समवायस्यैकत्वं वा नानात्वम्? इत्यादिसमस्यानां समाधानायैव प्रस्तुतोऽयमालेखः। न्यायवैशेषिकदर्शनसम्बद्धयोः विशेषसमवाययोः स्वरूपाध्ययनमेवास्यानुसन्धानात्मकस्यालेखस्य मुख्यं क्षेत्रं सीमा च वर्तेते। मूलतो न्यायवैशेषिकदर्शनमस्यानुसन्धानात्मकालेखस्य क्षेत्रं विद्यते चेद् विशेषस्य समवायस्य च विश्लेषणमेवास्य सीमा वर्तते। सम्प्रति न्यायवैशेषिकदर्शनाभिमतयोः विशेषसमवायपदार्थयोः विश्लेषणं विधीयते।

## अध्ययनविधिः

प्रस्तुतोऽयमालेखः पुस्तकालयीयविधिमवलम्ब्य सज्जीकृतो वर्तते। अत्र न्यायदर्शनसम्बद्धेभ्यो वैशेषिकदर्शनसम्बद्धेभ्यश्च सूत्रभाष्यादिग्रन्थेभ्यः, विशेषसमवायपदार्थप्रतिपादकग्रन्थान्तरेभ्यश्च सामग्रीः सङ्कलिता विद्यन्ते। सङ्कलिताभ्यः सामग्रीभ्यः प्राप्ततथ्यानामाहोस्वित् सामान्यविषयकचिन्तनानां विश्लेषणं विधाय निष्कर्षः प्रस्तुतो विद्यते।

## सैद्धान्तिकाधारः

आलेखेऽस्मिन् न्यायवैशेषिकदर्शनाभिमतग्रन्थानुसारं विशेषसमवायपदार्थौ विश्लिष्टौ वर्तेते। न्यायवैशेषिकसम्बद्धाः सूत्रभाष्यादिग्रन्थाः, एतद्विषयसम्बद्धा व्याख्यानात्मका ग्रन्थाश्चात्र सैद्धान्तिकाधारत्वेन स्वीकृताः। विशेषतोऽस्मिन् अनुसन्धानात्मकालेखे वैशेषिकसूत्रम्, प्रशस्तपादभाष्यम्, वैशेषिकसूत्रोपस्कारः, कारिकावली, न्यायसिद्धान्तमुक्तावली, तर्कभाषा, भारतीय न्यायशास्त्र, तर्कामृतम्, तर्कसङ्ग्रहश्चेत्यादिग्रन्थाः सैद्धान्तिकाधारत्वेन परिगणिता विद्यन्ते। एतादृशसैद्धान्तिकाधारे विशेषस्वरूपं समवायस्वरूपञ्च विविच्य सज्जीकृतोऽयमालेखः। अनुसन्धानात्मकालेखेऽस्मिन् प्रविध्यादिविषयं व्यवस्थातुं प्रचलिता (एपीए)पद्धतिरनुसृता वर्तते।

## विश्लेषणप्रक्रिया

'विशेषसमवायपदार्थपरिशीलनम्' इति शीर्षके केन्द्रीभूयायमनुसन्धानात्मकालेखः प्रस्तुतः। प्रथमन्तावदस्यानुसन्धानात्मकालेखस्य कृते न्यायवैशेषिकसम्बद्धग्रन्था निर्धारिताः। तत्र हि विशेषपदार्थविश्लेषणे कणादोक्तविशेषस्वरूपं प्रदर्श्य विशेषस्य नित्यद्रव्यवृत्तित्वस्वीकारे युक्तिप्रदर्शनम्, अस्वीकारे च परमाणुभेदासिद्धिप्रसङ्गः प्रस्तुतः। एवमेव समवायपदार्थविश्लेषणेऽपि कणादप्रभृतीनामाचार्याणां

मतं विश्लिष्य समवायस्य विद्यमानत्वे प्रमाणम्, नित्यत्वम्, एकत्वम्, अनुमेयत्वञ्च प्रस्तुतं वर्तते ।

**विशेषः**

वैशेषिकोक्तपदार्थेषु पञ्चमपदार्थत्वेन विशेषः परिगणितो विद्यते । विशेषो नाम नित्यद्रव्येषु विद्यमानः पदार्थः । वैशेषिकैः परमाणूनां परस्परं भेदसिद्धये विशेषः स्वीकृतः । विशेषपदार्थस्वीकृतत्वादेवास्य कणादप्रणीतशास्त्रस्य वैशेषिकं नाम सञ्जातम् । अन्येन केनापि दर्शनेन विशेषपदार्थो नाङ्गीकृतः, परन्तु काणादर्शनेन विशेषनामको कश्चन विलक्षणपदार्थोऽङ्गीकृतः । अत एवास्य दर्शनस्य नाम वैशेषिकदर्शनमिति । एतेन विशेषमधिकृत्य प्रवृत्तं दर्शनं वैशेषिकदर्शनमिति ज्ञातं भवति । विगतः शेषो यस्य तद् विशेषम् । विशेषमेव वैशेषिकमित्यनेन विग्रहेण विशेषपदस्यार्थो निर्विशेषमित्यपि बोधो भवति । सूत्रकारः कणादः "अन्यत्राऽन्त्येभ्यो विशेषेभ्यः" (वैशेषिकसूत्रम्, १।२।६) इत्यनेन सूत्रेण विशेषं निरूपयति । अस्मिन् सूत्रे विशेषस्योल्लेखः कृतः कणादेन ।

प्रशस्तपादभाष्ये तु "नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः । ते खल्वत्यन्तव्यावृत्तिहेतुत्वाद्विशेषा एव" (देवाचार्यः, सन् २०१६, पृ.५) इत्येवंप्रकारेण विशेषो निरूपितः । नित्यद्रव्यवृत्तयो विशेषास्तु अन्त्या इति । तेषां च विशेषाणामत्यन्तव्यावृत्तिमात्रहेतुत्वाद् विशेषा एव ते, न च द्रव्यत्वादिवत् सामान्यमपीति । किञ्च- "अन्तेषु भवा अन्त्याः, स्वाश्रयविशेषकत्वाद्विशेषाः । विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमाना अत्यन्तव्यावृत्तिबुद्धिहेतवः" (देवाचार्यः, सन् २०१६, पृ.२८४) अर्थात् स्वाश्रयद्रव्यभेदेन विशेषनामकः पदार्थोऽस्ति। उत्पत्तिविनाशरहितत्वेन नित्यद्रव्येषु पृथिव्यप्तेजोवायुगतपरमाणुषु, आकाशकालदिगात्ममनस्सु चेमे विशेषा विद्यमानास्सन्तः अत्यन्तव्यावृत्तिबुद्धेः कारणत्वमभ्युपगच्छन्तीति । सूत्रोपस्कारे तु "अन्तेऽवसाने भवन्तीत्यन्त्या, यतो न व्यावर्त्तकान्तरमस्तीत्याचार्याः" (मिश्रः, सन् १९६९, पृ. ८९) । व्यावृत्तप्रत्यानुरोधान्नित्यद्रव्येषु विशेषस्यास्तित्वं स्वीकर्तव्यमेव । अनेनैव प्रकारेण विशेषेष्वपि परस्परव्यावृत्तिप्रत्ययानुरोधाद् व्यावर्तकान्तरं विशेषं कल्प्यते, तर्हि तृतीयव्यावर्तकान्तरमपि कल्पनीयमिति अनवस्थादोषः । अत एव विशेषे व्यावर्तकान्तरापेक्षा न स्वीक्रियते । यथा प्रदीपप्रकाशः स्वप्रकाशनाय प्रकाशान्तरं नापेक्षते, तद्वद्विशेषोऽपि ।

अत्रेदं विचारणीयम्- विशेषास्तु प्रतिव्यक्तिभिन्नाः, अत एवानन्ताः । नित्यद्रव्याणामनन्तत्वेन तद् वृत्तिविशेषाणामप्यानन्त्यमिति ज्ञेयम् । पृथिव्यप्तेजोवायूनां परमाणवः, आकाशकालदिगात्ममनांसि चैतानि नित्यद्रव्याणि । एतेषु नित्यद्रव्येषु विशेषाः तिष्ठन्तीति भावः । नित्यो नाम कः ? उच्यते- ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वं नित्यत्वमिति । यः ध्वंसभिन्नस्सन् ध्वंसस्याप्रतियोगी, सः नित्यः । अप्रतियोगि नाम प्रतियोगिभिन्नम् । यस्याभावः, स प्रतियोगी । यस्मिन् अभावः, सोऽनुयोगी । यथा "भूतले घटाभावः" इत्यत्र घटस्याभावो दृश्यते, अतः घटः प्रतियोगी । कुत्राभावो विद्यते ? भूतल इत्येव वक्तव्यं किल, अतः भूतलमनुयोगीति । पृथिव्यप्तेजोवायुस्थपरमाणूनाम्, आकाशकालदिगात्ममनसां नाशासम्भवात्तेषां ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वरूपलक्षणसमन्वयाद् नित्यत्वं नूनमेव सिद्धयति । एतेषु नित्यद्रव्येषु विशेषाः तिष्ठन्ति ।

न्यायसिद्धान्तमुक्तावलीकारस्तु निजनिर्मितकारिकायां विशेषं निरूपयति यत्-

अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः (भट्टाचार्यः, सन् २००३, कारिका-१०)

नित्यद्रव्येषु वृत्तित्वं भवति विशेषस्य । स च अन्त्योऽपि । अन्त्यो नाम विशेषस्यापेक्षया अन्यः कश्चन व्यावर्तको नास्तीत्यर्थः । अत एव तस्य स्वतोव्यावर्तकत्वं सिद्ध्यति । विशेषपदार्थस्य सार्थक्यं प्रतिपादयति ग्रन्थकारः - "घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः, परमाणूनां परस्परभेदको विशेष एव । स तु स्वत एव व्यावृत्तः, तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः" (भट्टाचार्यः, सन् २००३, पृ. ५१-५२) । अनेन नित्यद्रव्यवृत्तित्वे सति स्वतोव्यावर्तकत्वं विशेषस्य लक्षणमिति ज्ञायते । घटाद्यारभ्य द्व्यणुकपर्यन्तं तत्तदवयवानां भेदेन तेषां परस्परं भेदः स्यादपि निरवयवानां परमाणूनां परस्परं भेदः कथम् ? इत्यत्रोच्यते विशेषादेव तेषां परस्परं भेद इति । विशेषाणामपि परस्परं भेदसाधनाय अन्यः कश्चन विशेषान्तरः तदवयवो वा स्वीकर्तव्य एवेति प्रश्ने विशेषभेदसाधनाय विशेषान्तरस्वीकारो नावश्यकः । स तु स्वत एव व्यावृत्तः । परमाणूनां परस्परं भेदं ज्ञापयन् स्वतो व्यावृत्तो भवतीति तस्य स्वतोव्यावर्तकत्वं सिद्ध्यति । एवंरूपेण विशेषस्य कार्यद्वयं सञ्जातम्- नित्यद्रव्येषु व्यावृत्तिबुद्धिसम्पादनमित्येकम् । विशेषेषु व्यावृत्तिबुद्धेः कारणत्वञ्चेत्यपरम् ।

अत्रायं भावः - विशेषपदार्थसद्भावे का युक्तिः ? इति प्रश्ने घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात् परस्परं भेदो वर्तते किल । कथम् ? 'एतद्घटः तद्घटभिन्नः एतत्कपालारब्धत्वात्' इत्यनुमानेन घटद्वयोः परस्परं भेदः । अत्र 'भिन्नभिन्नमूर्तानां समानदेशताविरोधः' इत्यनेन नियमेन स्थानभेदेनैव घटद्वयोः परस्परं भेदसिद्धिर्भवत्येवेति वक्तुं न शक्यते । कुतः ? तेषां स्थानभेदोऽपि अवयवभेदेनैव वक्तव्यं खलु । अतोऽवयवभेदेनैन घटद्वयोः परस्परं भेदो वक्तव्यः । तथैव 'एतत्कपालम्, तत्कपालभिन्नम्, एतत्कपालिकारब्धत्वात्' इत्यनुमानेन कपालद्वयोः परस्परं भेदः । पुनः 'एतत्कपालिका, तत्कपालिकाभिन्नः, भिन्नावयवारब्धत्वात्' इत्यनुमानेन कपालिकाद्वयोरपि परस्परं भेदः सिद्ध्यतीत्येवंरीत्या त्रसरेणुपर्यन्तं गत्वा पुनः 'एतत्त्रसरेणुः, तत्त्रसरेणुभिन्नः, एतद्द्व्यणुकारब्धत्वात्' इत्यनुमानेन त्रसरेणोः परस्परं भेदः । 'एतद्द्व्यणुकं तद्द्व्यणुकभिन्नम्, एतत्परमाण्वारब्धत्वात्' इत्यनुमानेन द्वयोर्द्व्यणुकयोः परस्परं भेदः सिद्ध्यति ।

इदानीं यावत् तत्तदवयवभेदात् तत्तत्पदार्थभेदः सिद्धः । परमाणूनां परस्परं भेदो न वा ? इति महान् प्रश्नः । परस्परं भेदो वर्तत एवेत्यपि वक्तुं न शक्यते । कुतः ? परमाणूनां निरवयवत्वादिति । यदि परमाणवः सावयवाः स्युः तर्हि 'एतत्परमाणुः, तत्परमाणुभिन्नः तत्परमाण्ववयवारब्धत्वात्' इत्यनुमानेन परमाणूनां परस्परं भेदः सिद्ध्येन्नाम । न च तथा वक्तुं शक्यम् । परमाणूनां निरवयवत्वात्तेषां सावयवत्वाभावात् परस्परं भेदः न कथञ्चनापि सिद्ध्यति । परमाणुभेदसिद्धिर्न भवतु, का हानिः ? इति हठादुच्यते, तर्हि परमाणुभेदसिद्ध्यभावे द्व्यणुकभेदसिद्धिर्न स्यात् । द्व्यणुकभेदसिद्ध्यभावे त्रसरेणुभेदसिद्धिर्न स्यात् । एवमेव रीत्या कपालिकाभेदसिद्धिर्न स्यात् । कपालिकाभेदसिद्ध्यभावे कपालभेदसिद्धिर्न स्यात् । कपालभेदसिद्ध्यभावे घटभेदसिद्धिर्न स्यादित्यव्यवस्था । घटयोः घटानां वा परस्परं भेदस्तु दृश्यत एव । लोकानुभवोऽपि तथैव विद्यते किल ।

अस्मादेव कारणात् कणादेन परमाणूनां परस्परं भेदसाधनाय विशेषनामकः कश्चन पदार्थः स्वीकृतः । अत एव वैशेषिकदर्शननाम्ना विख्यातं काणाददर्शनम् । विशेषपदार्थस्वीकारे तु 'एतत्परमाणुः, तत्परमाणुभिन्नः, एतद्विशेषात्' इत्यनुमानेन परमाणूनां परस्परं भेदः सिद्ध्यति । अन्यथा परमाणूनां परस्परं

भेदाभावे (भेदासिद्धौ) द्व्यणुकादीनामपि भेदासिद्धिः । तेन घटादीनामपि परस्परं भेदासिद्धिप्रसङ्गः स्यादिति निष्कर्षरूपेण वक्तुं शक्यते । किञ्च दृश्यमानघटपटादिषु पदार्थेषु परस्परभेदस्य प्रयोजकन्तु संस्थानभेदो वर्तते । घटादिपदार्थानामन्त्यावयवपरमाणुषु परस्परं भेदो यदि न स्यात्तर्हि अवयवावयविभावोत्पत्तिर्न जायेत । अतः सकलपरमाणवः परस्परं भिन्ना इति कल्प्यते । एवमेव नित्यानामात्मादानामपि विशेषभेदादेव परस्परं भेदो ज्ञेयः ।

अत्र पूर्वपक्षी शङ्कते यत्- योगिनां योगजधर्मसामार्थ्याद् यथातीन्द्रियाणां पदार्थानां ज्ञानं सम्भवतीत्यनेन अतीन्द्रियपरमाणूनामपि विशेषस्यापेक्षां विनैव परस्परं भेदज्ञानं जायते । तथा सति विशेषस्वीकारो नावश्यक इत्यत्रोच्यते- योगिनां योगजबलेन अतीन्द्रियपदार्थज्ञानम्, परमाणूनां परस्परं भेदज्ञानं वा निमित्तमन्तरा न सम्भवति । तत्र निमित्तन्तु विशेष एव (देवाचार्यः, सन् २०१६, पृ.२८७) । पुनः पूर्वपक्षी शङ्कते - एकस्य विशेषस्यापरविशेषतो भेदो यदि स्वयं भवितुं शक्नोति चेदेकस्य परमाणोरपरपरमाणुतः भेदोऽपि स्वयं स्यान्नाम अर्थात् स्वतोव्यावर्तकत्वं परमाणूनामपि स्यात् । तथा सति विशेषकल्पनावसर एव नागच्छेदिति प्रश्ने प्रशस्तपादभाष्ये ग्रन्थकारः समाधत्ते- “अन्त्यविशेषेष्विव परमाणुषु कस्मान्न स्वतः प्रत्ययव्यावृत्तिः कल्प्यत इति चेन्न, तादात्म्यात्” (देवाचार्यः, सन् २०१६, पृ.२८७) । विशेषस्य स्वभावो व्यावृत्तिरेव वर्तते । परमाणोः स्वभावस्तु न व्यावृत्तिरूपः, अपितु तादात्म्यरूप इति ।

तर्कभाषाग्रन्थे तु “विशेषो नित्यो नित्यद्रव्यवृत्तिः । व्यावृत्तिबुद्धिमात्रहेतुः” (मिश्रः, सन् २००३, पृ.४१०) । अत्र व्यावृत्तिबुद्धिमात्रहेतुरित्यस्य विशेषपदार्थः भेदबुद्धेः प्रकाशको भवतीति तात्पर्यम् । जगति विद्यमानानां पदार्थानां परस्परं भेदस्तु तदवयवसंस्थानभेदेन, तद्गुणभेदेन, तत्कर्मभेदेन च प्रतीयते, किन्तु यावन्नित्यद्रव्याणां परस्परं भेदसिद्धिर्न सम्भवत्येव । अतः तादृशनित्यद्रव्याणां परस्परं भेदसाधनाय विशेषनामकः पदार्थः स्वीकर्तव्य इति ।

न्यायबोधिनीकारस्तु एवं वदति- “नित्यद्रव्येषु परमाण्वादिषु वर्तमानाः, अत एव व्यावर्तकाः=इतरभेदानुमितिहेतवः= नित्यद्रव्यवृत्तित्वरूपपक्षधर्मताप्रयोज्येतरभेदानुमापकताशालिन इत्यर्थः” (गोवर्धनसुधीः, सन् २०१७, पृ.२८१) अर्थात् स्वतोव्यावर्तकत्वरूपविशेषाः नित्यद्रव्येषु परमाण्वादिषु इतरपरमाण्वादिभ्यः परस्परं भेदमनुमापयन्तीति विशेषेषु इतरभेदानुमापकत्वं वर्तते । परमाणुभेदसिद्धौ विशेष एव तत्र हेतुर्भवति । स च हेतुः पक्षे स्वसाध्यं साधयितुं समर्थः । नित्यद्रव्यरूपपक्षे हेतोर्विशेषस्य विद्यमानत्वादेव इतरभेदानुमापकत्वरूपसाध्यः सिद्ध्यति । नान्यथा ।

नव्यास्तु विशेषस्य स्वतन्त्रपदार्थत्वं नाङ्गीकुर्वन्ति । कुतः ? यथा विशेषस्य स्वतो व्यावर्तकत्वं स्वीक्रियते, तद्वत् परमाणूनामपि स्वतो व्यावर्तकत्वस्वीकारापत्तिः । अतो नव्यैः विशेषः स्वतन्त्रपदार्थत्वेन नाङ्गीक्रियते । वेदान्तिभिरथ च मीमांसकैरपि विशेषो न स्वीक्रियत इति । विशेषचिन्तनानन्तरमिदानीं समवायो विविच्यते-

**समवायः**

सप्तपदार्थेष्वन्यतमोऽयं समवायः । समवायः कश्चन सम्बन्धो नित्यश्च । स च अयुतसिद्धवृत्तिः । न्यायदर्शने समवायः सम्बन्धात्मकेन स्वीकृतश्चेद् वैशेषिकदर्शने समवायो न सम्बन्धमात्रमपितु, पदार्थोऽपि । यद्यपि न्यायदर्शने वैशेषिकाभिमतसमवायविषये नान्या दृष्टिः, तथापि वैशेषिकसिद्धान्तेषु समवाय एकः

प्रमुखसिद्धान्त इति सर्वे आमनन्ति। सांख्य-योग-भाट्टमीमासा-वेदान्त-बौद्ध-जैनादिषु दर्शनान्तरेषु विविधैस्तर्कैः समवायो निराकृतः । सूत्रकारेण कणादेन समवायमित्थं प्रतिपादयति- "इहेदमिति यतः कार्यकारणयोः स समवायः" (वैशेषिकसूत्रम्, ७।२।२६) इति । कार्यकारणयोः मध्ये 'कारणे कार्यं विद्यते' इत्याकारप्रतीतिः येन कारणेन जायते, स समवायः ।

अत्रेदं बोध्यम्- कस्माच्चन वस्तुनः किञ्चन वस्तूत्पद्यते चेत्, तयोर्वस्तुनोः कार्यकारणभावः स्वीक्रियते । तत्र कारणे कार्योत्पत्तिः सञ्जायते । यथा कपालद्वयोः घट उत्पद्यते अर्थात् कपालयोः घट आश्रितो भवति । कपालाभावे घटस्याप्यभावः । अनेन कपालस्य कारणत्वं घटस्य कार्यत्वं सिद्ध्यति । कारणमवयवः कार्यन्तु अवयवी भवति । एवञ्च किञ्चन वस्तु कुत्रचन तिष्ठति चेत्, तयोः परस्परं कश्चन सम्बन्धो वाच्यः । अत्र घटरूपकार्यं कपालरूपकारणे येन सम्बन्धेन तिष्ठति, स सम्बन्धः समवाय इति सूत्रार्थः । एवमेव 'अस्मिन् घटे कपालम्', 'एषु तन्तुषु पटः', 'अस्मिन् घटे रूपम्', 'अस्मिन् घटे कर्म', ' अस्मिन् घटे घटत्वम्' 'अस्मिन् परमाणौ विशेषः' इत्यादिप्रतीतेः कारणं समवायः ज्ञातव्यः ।

प्रशस्तपादभाष्ये तु अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्धः इह प्रत्ययहेतुः स समवायः (देवाचार्यः, सन् २०१६, पृ.६) । किञ्च "द्रव्यगुणकर्मसामान्यविशेषाणां कार्यकारणभूतानाम्, अकार्यकारणभूतानां वाऽयुतसिद्धानामाधार्याधारभावेन अवस्थितानाम् इहेदमितिबुद्धिर्यतो भवति, यतश्चा सर्वगतगतानामधिगतान्यत्वानामविष्वग्भावः स समवायाख्यः सम्बन्धः" (देवाचार्यः, सन् २०१६, पृ. २८९) इति । अयुतसिद्धानामाधाराधेयभावयुतानां पदार्थानां यः सम्बन्धः, स इह प्रत्ययहेतुः= इह कारणे=कपाले घटो वर्तत इत्याकारकप्रतीतेः हेतुः समवायो भवतीत्यर्थः । इह प्रत्ययहेतुरिति पदं समवायस्य विशेषणमित्यपि स्मर्तव्यम् ।

उपर्युक्तकथनेन अयुतसिद्धवृत्तिसम्बन्धत्वं समवायत्वमिति ज्ञातं भवति । तत्र का नाम अयुतसिद्धिः ? इति प्रश्ने वैशेषिकसूत्रोपस्कारे गन्थकारो वदति- "असम्बद्धयोरविद्यमानत्वमयुतसिद्धिः" (मिश्रः, सन् १९६९, पृ. ४४०) इति । असम्बद्धयोः द्वयोः पदार्थयोरविद्यमानत्वम्=पृथग्रुपेण स्थातुमशक्यमेव अयुतसिद्धिः । किञ्च "ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ । यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति" (भट्टः सन् २०१७, पृ. २८४) इति । कयोश्चिद् द्वयोः पदार्थयोर्मध्य एकस्य पदार्थस्य विनाशावस्थां यावत् कारणाश्रितमेव तिष्ठति चेत्तयोरयुतसिद्धत्वमिति । तादृशायुतसिद्धवृत्तिसम्बन्धः समवायो भवतीत्यर्थः ।

अस्याशयस्त्वेवम्- ययोः=पटतन्त्वोर्मध्ये, एकमविनश्यत्=एकं पटात्मकं वस्तु (पदार्थः), अविनश्यदवस्थम्=विनाशावस्थामनापन्नं सत् (यावत्पर्यन्तमेकं वस्तु नाशावस्थां न प्राप्नोति, तावत्पर्यन्तमिति भावः), अपराश्रितमेव=तन्त्वाश्रितमेव, अवतिष्ठते=विद्यते, तौ=पटतन्तू, अयुतसिद्धौ=अयुतसिद्धपदवाच्यावित्यर्थः । एवञ्च पटस्य तन्तुषु विद्यमानत्वात् तन्तुरूपकारणे पटरूपकार्यस्योत्पत्तिदर्शनात्, येन हेतुना (सम्बन्धेन) तन्तुषु पट इत्याकारप्रतीतिः, स समवाय इत्यर्थः । अयुतसिद्धपदवाच्यत्वं पञ्चसु विद्यते । अवयवावयविनोः अयुतसिद्धत्वमिदानीं प्रस्तुतम् ।

एवमेव गुणगुणिभूतौ रूपपटावपि अयुतसिद्धौ । तद्यथा ययोः पटरूपयोर्मध्ये पटगतरूपं विनाशावस्थामनापन्नं सत् पटाश्रितमेव तिष्ठति । अतः तौ गुणगुणिनौ रूपपटौ अयुतसिद्धौ । तद्

वृत्तिसम्बन्धः समवाय इति । एवंरीत्या क्रियाक्रियावतोः=द्रव्यकर्मणोः, जातिव्यक्त्योः=पटपटत्वयोः घटघटत्वयोर्वा, विशेषनित्यद्रव्ययोः=विशेषपरमाण्वोः यः सम्बन्धः, स समवाय इति बोध्यम् । तर्कसङ्ग्रहस्य श्रीनिवासमुखोल्लासिनिव्याख्याने टीकाकर्तुरभिप्राय एवं प्रवहति- "घटपटादिवदादितः पृथक् स्थातुं योग्यौ युतसिद्धौ । तादृशद्रव्ययोः सम्बन्धः संयोगो भवति । स्वतन्त्ररूपेण पृथक् स्थितिर्ययोर्नास्ति, ययोरन्यतरः स्थितिकालं यवदन्याश्रित एव स्थातुं शक्नोति=पृथक् कदाचिदपि न भवति, तौ द्वावयुतसिद्धौ । तयोश्च सम्बन्धः समवायः" (भट्टः सन् २०१७, पृ. २८४) । विश्वनाथः कारिकावल्यामेवंरीत्या समवायं प्रतिपादयति-

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ॥ (भट्टाचार्यः, सन् २००३, कारिका-११)

घटादीनाम्=कार्यभूतानां घटादीनामवयवीनाम्, कपालादौ=समवायिकारणात्मककपालादौ (अवयवादौ) यः सम्बन्धः, स समवाय इति । अत्रादिपदेन पटादिकं ग्राह्यम् । तथा च पटस्य समवायिकारणात्मकानां तन्तूनां च यः सम्बन्धः, स समवाय इति । एवमेवान्यत्रापि ज्ञेयम् । तथैव द्रव्येषु=पृथिव्यादिनवद्रव्येषु, गुणकर्मणोः= स्वस्वगुणानां स्वस्वकर्मणाञ्च यः सम्बन्धः, स समवायः । तेषु=द्रव्यगुणकर्मसु, जातेः=सत्ताद्रव्यत्वादिजातीनां सम्बन्धः समवाय इति ।

अनेन अवयवावयविनोः, द्रव्यगुणयोः, द्रव्यक्रिययोः जातिव्यक्त्योश्च सम्बन्धः समवाय इति बोधो भवति । तदुक्तञ्च- "अवयवावयविनोः, जातिव्यक्त्योः, गुणगुणिनोः, क्रियाक्रियावतोः, नित्यद्रव्यविशेषयोश्च यः सम्बन्धः, स समवायः । समवायत्वं नित्यसम्बन्धत्वम् (भट्टाचार्यः, सन् २००३, पृ. ५३-५४) इति । तर्कभाषाग्रन्थे तु अयुतसिद्धयोः सम्बन्धः समवायः" (मिश्रः, सन् २००३, पृ. ४१२) । अयुतसिद्धयोः सम्बन्धः समवाय इति तूपर्येव विवेचितम् । पुनः तद्विवेचनस्यावश्यकता न स्यादेव । तर्कामृतग्रन्थे "स्वसम्बन्धिभिन्नो नित्यः सम्बन्धः समवायः, तेन स्वरूपसम्बन्धस्य संयोगस्य च निरासः" (भट्टाचार्यः, सन् १९९३, पृ. ३४) इति । अस्यार्थस्तु यः स्वसम्बन्धिभिन्नः, नित्यः सम्बन्धः, स समवाय इति । अत्र स्वरूपसम्बन्धेऽतिव्याप्तिवारणाय स्वसम्बन्धिभिन्न इति पदम् देयम् । संयोगवारणाय नित्य इति पदम् । आकाशादावतिव्याप्तिवारणाय सम्बन्ध इति पदं देयम् । अनेन विवेचनेन अयुतसिद्धवृत्तिसम्बन्धत्वं समवायस्य लक्षणमिति निष्कृष्टलक्षणं सम्पद्यते ।

## समवायसत्त्वे प्रमाणम्

ननु समवायसत्त्वे किं प्रमाणम् ? उच्यते, 'इहेति बुद्धेः कारणत्वमेव' तत्सत्त्वे प्रमाणमित्येव वक्तव्यं किल । इह तन्तुषु पटः, इह कपाले घटः, इह घटे रूपम्, इह पटे रूपम्, इह रूपे रूपत्वमित्यादिप्रतीतिरेव समवायसत्त्वे प्रमाणमिति भावः । यथोक्तम्- "इहाऽत्मनि ज्ञानम्, इहाऽकाशे शब्द इतीहबुद्धिरुत्पद्यमाना न विना सम्बन्धमुत्पत्तुमर्हति, तेनानुमीयतेऽस्ति कश्चित् सम्बन्धः । न चासौ संयोग एव........" (मिश्रः, सन् १९६९, पृ. ४४१) अर्थात् इहाऽत्मनि ज्ञानम्, इहाऽकाशे शब्दः, इह पटे रूपम्, इह रूपे रूपत्वमित्याकारकबुद्धिः कञ्चन सम्बन्धं विनोत्पत्तुं नार्हतीति तत्र कश्चन सम्बन्धोऽनुमीयते । योऽनुमेयः सम्बन्धः, स एव समवायः । संयोगकल्पनायास्त्वत्रावसर एव नास्ति । कुतः ? द्रव्ययोरेव संयोग इति नियमसत्त्वात् ।

समवायसत्त्वे प्रमाणान्तरं प्रदर्श्यते- "गुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानम्" (भट्टाचार्यः, सन् २००३, पृ. ५३-५४) अर्थाद् यथा 'दण्डवान् पुरुषः' इत्यत्र विशिष्टबुद्धौ विशेषणं दण्डः, विशेष्यः पुरुषो वर्तते । 'द्रव्ययोः संयोगः'

इति नियमेन तयोर्दण्डपुरुषयोः विशिष्टबुद्धित्वात् यः सम्बन्धः, स संयोगः । तथैव 'रूपवान् पटः' इत्यत्र विशिष्टबुद्धौ विशेषणं रूपम्, विशेष्यः पटो वर्तते । 'गुणगुणिनोः समवायः' इति नियमेन तयोः रूपपटयोः विशिष्टबुद्धित्वात् यः सम्बन्धः, स समवाय इति सिद्ध्यति । तथा च 'रूपवान् पटः' इत्याकारविशिष्टबुद्धिः, विशेषणविशेष्यसम्बन्धविषया, विशिष्टबुद्धित्वात्, 'दण्डी पुरुषः' इति विशिष्टबुद्धिवदित्यनुमानेन समवायस्य सिद्धिर्भवतीति दिक् । एवमेव 'क्रियावान् घटः' इत्यत्रापि पूर्ववदनुमानप्रकारेण तयोः घटक्रिययोः सम्बन्धः समवायो ज्ञेयः ।

## समवायस्य नित्यत्वम्

इदानीं समवायस्य नित्यत्वं विचार्यते- अनुयोगिनः प्रतियोगिनश्चानित्यत्वेऽपि न संयोगवत् समवायस्य अनित्यत्वमपितु, नित्यत्वमेव । कथम् ? सत्तावत् समवायोऽपि अकारणः, अतो नित्यः । समवायसम्बन्धस्य सम्बन्धीनामनित्यत्वेऽपि संयोगसम्बन्धवन्न अनित्यः । कुतः ? सत्ताजातिवत्तस्य कारणशून्यत्वादिति । अकारणश्च कथम् ? उच्यते, केनापि प्रमाणेन सत्तायाः कारणोपलब्ध्यभावाद् यथा नित्यत्वं तद्वत् समवायस्यापि केनापि प्रमाणेन कारणोपलब्ध्यभावाद् नित्यत्वमिति (देवाचार्यः, सन् २०१६, पृ. २९६) । समवायस्य अनित्यत्वं स्वीकुर्वतां प्राभाकराणां मतं निरस्य नित्यत्वं प्रतिष्ठापितं विद्यते वैशेषिकसूत्रोपस्कारे । तद्यथा- "रूपं नष्टमिति हि प्रत्ययो न तु रूपसमवायो नष्ट इति कस्यापि प्रत्ययः" (मिश्रः, सन् १९६९, पृ. ४४६) । श्यामघटस्य नाशानन्तरं रक्तघट उत्पद्यते । तत्र श्यामरूपं हि घटे समवायेन तिष्ठति । श्यामरूपं नष्टमित्येव प्रतीतिर्भवति सर्वेषाम् । न तु तत्समवायो नष्ट इति प्रतीतिः । स च समवायो यद्यनित्यस्तर्हि श्यामरूपं नष्टमितिप्रतीत्यपेक्षया तत्समवायो नष्ट इति प्रतीतिः स्यात् । न च तथा प्रतीतिरनुभवसिद्धेति तस्य नित्यत्वं सिद्धम् ।

## समवायस्य प्रत्यक्षत्वमनुमेयत्वं वा

समवायः प्रत्यक्षो वानुमेय इत्यत्र न्यायवैशेषिकयोः मतभेदो दरीदृश्यते । षोडशपदार्थवादिनो नैयायिका हि समवायस्य प्रत्यक्षत्वं वैशेषिकास्तु अनुमेयत्वमुररीकुर्वन्ति । न्यायवार्तिकस्थसमवायविषयकचिन्तनं संगृह्य 'भारतीय न्यायशास्त्रम्' इत्यस्मिन् ग्रन्थे ग्रन्थकारो वदति यत्- उद्योतकरप्रभृतिभिराचार्यैः अभाववत् समवायस्यापि विशेषणविशेष्यभावसन्निकर्षेण बोधो (प्रत्यक्षत्वम्) भवति । एवमेव तात्पर्यटीकाकर्तुरप्याशयः तथैव वर्तत इति प्रत्यपादयत् (बिजल्वानः, सन् १९९८, पृ. ५६३) । वैशेषिकास्तु तन्न स्वीकुर्वन्ति । वैशेषिकसूत्रोपस्कारे ग्रन्थकर्त्रा "समवायः, अतीन्द्रियः, आत्मान्यत्वे सत्यसमवेतभावत्वात्, मनोवत् कालादिवद्वा" (मिश्रः, सन् १९६९, पृ. ४४६) इत्यनेनानुमानेन समवायस्यानुमेयत्वं साधितम् । तथाहि यो य आत्मान्यत्वे सत्यसमवेतभाववान्, स सोऽतीन्द्रियः, यथा मनः । यथा मनस आत्मभिन्नत्वे सति असमवेतभाववत्वाद् अतीन्द्रियत्वं तद्वत् समवायस्यापि आत्मभिन्नत्वे सति असमवेतभाववत्वाद् अतीन्द्रियत्वं सिद्ध्यति ।

## समवायस्यैकत्वसिद्धिः

समवायस्यैकत्वं वा नानात्वमित्यस्मिन् विषये प्राभाकराः समवायस्य नित्यत्वं नाङ्गीकुर्वन्ति । ते हि समवायस्य नानात्वमनित्यत्वञ्च स्वीकुर्वन्ति । न्यायवैशेषिकाचार्यैस्तु तस्य नित्यत्वमुररीकृतं वर्तते । नैयायिकेष्वपि केचन रघुनाथशिरोमणिप्रभृतयः नव्याः समवायस्य नित्यत्वं नाङ्गीकुर्वन्ति । महर्षिणा

कणादेन “तत्त्वम्भावेन” (वैशेषिकसूत्रम्, ७।२।२८) इत्यनेन सूत्रेण समवायस्य नित्यत्वं प्रतिपादितम् । तत्त्वम्=एकत्वम् (समवायस्यैकत्वम्), भावेन=पूर्वोक्तसत्ताजातेः व्याख्यानेन सिद्धचतीति सूत्रार्थः । अत्रायं भावः- “सदिति लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भाव” (वैशेषिकसूत्रम्, १।२।१७) । एवमेव वैशेषिकसूत्रोपस्कारेऽपि “यथैका सत्ता सर्वत्र सद्बुद्धिप्रवर्तिका, तथैक एव समवायः सर्वत्र समवेतबुद्धिप्रवर्तकः स्वलिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च न हि समवायस्य विशेषलिङ्गं भेदकं लिङ्गमाकलयामो येन नानात्वमभ्युपगच्छामः” (मिश्रः, सन् १९६९, पृ. ४४५) । किञ्च “न च संयोगवन्नानात्वं भाववल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्च, तस्माद्भाववत्सर्वत्रैकः समवाय इति” (देवाचार्यः, सन् २०१६, पृ. २९२) इति । उपर्युक्तग्रन्थत्रयाणां विश्लेषणेनेदं वक्तुं शक्यते यत्- द्रव्यगुणकर्मसु द्रव्यं सत्, गुणः सन्, कर्म सदित्याकारबुद्धेः व्यवहारस्य वा कारणीभूतसत्तायाः अनेकत्वप्रतिपादकभेदस्य विशेषकारणाभावेन तस्याः एकत्वं सिद्धचतीति यथा विवेचितं तद्वत् सर्वत्र समवेतमित्याकारबुद्धेः प्रवर्तको यः समवायः, तस्य ‘इहेदम्’ इत्याकारप्रतीतौ नानात्वबोधकलिङ्गाभावेनैव एकत्वं सिद्धचतीति भावः ।

न्यायसिद्धान्तमुक्तावल्यान्तु स्वरूपसम्बन्धस्वीकारेणैव कार्यसिद्धिः, पुनः समवायकल्पनेन सिद्धसाधनम्, अर्थान्तरं वेत्याक्षेपकर्तृणां मीमांसकानां नव्यनैयायिकानाञ्च मतं खण्डयन् उत्तरयति विश्वनाथः- स्वरूपसम्बन्धकल्पनेन गुणवान् पटः, क्रियावान् पटः, जातिमान् पटः इत्यादिज्ञाने पटस्वरूप-गुणस्वरूप-क्रियास्वरूप-जातिस्वरूपाणामेव संसर्गभानान्नैकविधसंसर्गता कल्पनीया भवति । तथा च तत्तत्प्रतीतौ अनन्तस्वरूपाणां नैकविधसंसर्गत्वकल्पने गौरवात् स्वरूपसम्बन्धस्वीकारे नास्माकं दृष्टिः । अतो लाघवेनैकस्यैव समवायस्य सिद्धिरिति ।

अत्रेदं बोध्यम्- नव्यास्तु समवायसम्बन्धं नाङ्गीकुर्वन्ति, अपितु स्वरूपसम्बन्धमेव । स्वरूपसम्बन्धेनैव कार्यं चलति चेत् पुनः तस्यैव नामान्तरं प्रकल्प्य समवाय इति कथने अर्थान्तरदोषः । सिद्धसाधनदोषस्तु मीमांसकानामिति चिन्तनीयम् । अत्र पुन आशङ्का समुदेति यत्- समवायस्यैकत्वे सम्बन्धसत्त्वे सम्बन्धिसत्त्वमिति नियमेन ‘स्पर्शवान् वायुः’, ‘रूपवद् द्रव्यम्’ इत्यत्र स्पर्शसमवायो वायौ वर्तते । रूपसमवायश्च द्रव्ये वर्तते । एवञ्च यथा वायौ समवायेन स्पर्शस्य सत्त्वन्तथैव तत्समवायस्य सम्बन्धिनो द्रव्यादिगतरूपस्यापि सत्त्वं स्यान्नाम । तथा च वायौ रूपवत्ताप्रतीतिरापद्येत इति पूर्वपक्षिमतं खण्डयन् विश्वनाथो भणति यत्- सम्बन्धसत्त्वे सम्बन्धिसत्त्वमिति नियमेन वायौ रूपसमवायस्य विद्यमानत्वेऽपि रूपवृत्तित्वस्यैवाभावान्न वायौ रूपवत्ताप्रतीतिरिति दिक् (भट्टाचार्यः, सन् २००३, पृ. ५६) । एवंरीत्या समवायस्यैकत्वं प्रदर्शितम् ।

समवायविषयकचिन्तनानन्तरं निष्कर्षरूपेण तत्स्वरूपं हि निम्नानुसारेण ज्ञातुं शक्यते-

समवायः संयोगाद् द्रव्यादिभ्यश्च भिन्नः कश्चन पदार्थो वर्तते । अयुतसिद्धपदार्थेषु विद्यमानः सम्बन्धः समवायः । समवायः एको नित्यश्च । प्राभाकरमीमांसकास्तु समवायस्य नानात्वमनित्यत्वञ्च स्वीकुर्वन्ति । समवायः न्यायदृष्ट्या प्रत्यक्षगम्यः, वैशेषिकदृष्ट्या तु अनुमेयः । समवायः द्रव्येण गुणकर्मसामान्यविशेषान् सम्बद्धयति, सामान्यं गुणकर्मभ्याम् सम्बद्धयति, अवयविनमवयवेन सम्बद्धयति, परमाणून् विशेषेण च सम्बद्धयतीति दिक् ।

## निष्कर्षः

न्यायवैशेषिकदर्शनयोर्मध्ये विशेषतो वैशेषिकदर्शने विशेषपदार्थस्य निरूपणं कृतं दृश्यते । समवायपदार्थस्य तूभयत्रापि निरूपणं कृतं दृश्यते । कणादेन निरवयवानां परमाणूनां भेदसाधनाय पञ्चमपदार्थत्वेन विशेषः परिगणितो विद्यते । नित्यद्रव्येषु पृथिव्यप्तेजोवायूनां परमाणुषु, आकाशकालदिगात्ममनस्सु च विशेषो तिष्ठति । कणादप्रभृतीनामाचार्याणां चिन्तनं विश्लिष्येदं वक्तुं शक्यते यत्- उत्पत्तिविनाशरहितत्वेन विद्यमाना विशेषा हि अत्यन्तव्यावृत्तिबुद्धेः हेतवो भवन्ति । परमाणुभेदसाधनायैव विशेषः कल्पितः । विशेषभेदसिद्धये नान्यस्य विशेषस्यावश्यकता । विशेषेष्वपि परस्परव्यावृत्तिप्रत्ययानुरोधाद् व्यावर्तकान्तरं विशेषं कल्प्यते चेत्तर्हि ततोऽपि व्यावर्तकान्तरस्य कल्पना विधेयेति अनवस्थादोषः । अत एव विशेषे व्यावर्तकान्तरो न स्वीक्रियते । एवञ्चेद् विशेषाः कथं भिद्यन्ते परस्परम् ? इति प्रश्ने प्रदीपवत् स्वतोव्यावर्तकत्वेनैव ते परस्परं भिद्यन्त इति । यदि परमाणुभेदसिद्धये विशेषो नाङ्गीक्रियते, तर्हि परमाणुभेदासिद्धिरापद्येत । तेन घटादीनामपि परस्परं भेदासिद्धिप्रसङ्गः स्यादतो विशेषोऽङ्गीकार्य एवेति । नित्यद्रव्यवृत्तित्वे सति स्वतोव्यावर्तकत्वं विशेषत्वमिति निष्कर्षः प्रदत्तो वर्ततेऽत्र ।

एवमेव समवायविश्लेषणप्रसङ्गे समवायस्य अयुतसिद्धवृत्तिसम्बन्धत्वमिति लक्षणं निष्कर्षरूपेण प्रस्तुतं विद्यते । कार्यकारणयोः मध्ये 'कारणे कार्यं विद्यते' इत्याकारप्रतीतिः येन कारणेन जायते, स समवाय इति सूत्रकारस्य कणादस्याशयं विश्लिष्य शङ्करमिश्रप्रशस्तपादाचार्यप्रभृतीनामाचार्याणां मतमपि विश्लिष्टम् । तेन च विश्लेषणेन अयुतसिद्धानामाधाराधेयभावयुतानां पदार्थानां यः सम्बन्धः, स इह प्रत्ययहेतुः= इह कारणे=कपाले घटो वर्तत इत्याकारकप्रतीतेः हेतुः समवायो भवतीति । अयुतसिद्धवृत्तिसम्बन्धत्वं समवायस्य लक्षणमिति निष्कर्षः प्रस्तुतो विद्यते ।

एवमेव समवायस्य विद्यमानत्वे प्रमाणम्, समवायस्य नित्यत्वम्, समवायस्यैकत्वम्, समवायस्यानुमेयत्वञ्च साधितं वर्ततेऽत्र । विशेषसमवायपदार्थविषयकचिन्तनानन्तरमिदं ज्ञातं भवति यत्- नव्यमते विशेषो न स्वतन्त्रपदार्थः । वेदान्तिभिः मीमांसकैश्च विशेषो नाङ्गीकृतः । समवायः संयोगाद् द्रव्यादिभ्यश्च भिन्नः कश्चन पदार्थो वर्तते । अयुतसिद्धपदार्थेषु विद्यमानः सम्बन्धः समवायः । स च नित्यः, एकश्च । प्राभाकरमीमांसकैः समवायस्यानित्यत्वं नानात्वञ्च स्वीकृतम् । न्यायमते समवायः प्रत्यक्षगम्यः, वैशेषिकमते तु अनुमेय इत्यादिविषया अत्र निष्कर्षरूपेण विश्लिष्टा वर्तन्त इति दिक् ।

**कृतज्ञताज्ञापनम्**

आलेखेऽस्मिन् न्यायवैशेषिकदर्शनाभिमतयोः विशेषसमवायपदार्थयोः स्वरूपविश्लेषणक्रमे, सैद्धान्तिकविषयनिरूपणे, प्रविध्यादिविषये च परामर्शं प्रदातृभ्यो विद्वद्भ्यो धन्यवादं निवेदयन् सूक्ष्मेक्षिकया चालेखमिदमाद्यन्तं सम्परीक्ष्य यथावश्यकं परामर्शदातृभ्यो विषयविज्ञेभ्यो हार्दिकीं कृतज्ञतां व्यनज्मि ।

## सन्दर्भग्रन्थसूची

देवाचार्यः, प्रशस्तः (सन् २०१६). *प्रशस्तपादभाष्यम्,* व्याख्याता. ढुण्ढिराजशास्त्री, (पुनर्मुद्रणम्). चौखम्भासंस्कृतसंस्थानम् ।

बिजल्वानः, चक्रधरः (सन् १९९८). *भारतीय न्यायशास्त्र* (द्वितीयसंस्करणम्). उत्तरप्रदेशहिन्दीसंस्थानम् ।

भट्टः, अन्नम् (सन् २००८). *तर्कसंग्रहः,* आलोकव्याख्यासहितः, (व्याख्याता. के.एस्.वरदाचार्यः). आर्षग्रन्थप्रकाशनम् ।

भट्टः, अन्नम् (सन् २०१७). *तर्कसंग्रहः,* दीपिकान्यायबोधिनिपदकृत्यश्रीधरमुखोल्लासिनिव्याख्यासहितः, (सम्पादकः गोविन्दाचार्यः). चौखम्बासुरभारतीप्रकाशनम् ।

भट्टाचार्यः, जगदीशः (सन् १९९३). *तर्कामृतम्,* अनु. रामचन्द्रमिश्रः, (पञ्चमसंस्करणम्). चौखम्बाविद्याभवनम्।

भट्टाचार्यः, विश्वनाथपञ्चाननः (सन् २००३). *न्यायसिद्धान्तमुक्तावली,* किरणावलीसमाख्यव्याख्योपेता, व्याख्याता. पं.कृष्णवल्लभाचार्यः (षष्ठसंस्करणम्). चौखम्बासंस्कृतसंस्थानम् ।

मिश्रः, केशवः (सन् २००३). *तर्कभाषा,* आशुबोधिनिहिन्दीव्याख्योपेता, व्याख्याता. सुरेन्द्रदेवशास्त्री (पुनर्मुद्रणम्). चौखम्बाविद्याभवनम् ।

मिश्रः, शंकरः (सन् १९६९). *वैशेषिकसूत्रोपस्कारः* (व्याख्याता. ढुण्ढिराजशास्त्री). चौखम्भासंस्कृतसंस्थानम् ।

शास्त्री, द्वारिकादासः (सम्पादकः). (सन् १९९८). *षड्दर्शनसूत्रसङ्ग्रहः.* बौद्धभारती ।